श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवेङ्कटाचार्यस्य कृतिषु

# ॥ विंशतिरत्नमाला ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ विंशतिरत्नमाला ॥

सुदर्शनकृपालब्धवेदतत्त्वार्थसागरम्।
अनुष्ठितक्रतुशतं वन्देऽस्मत्पितरं गुरुम्॥

कुमारतातयाचार्यं सदाचारपरं सदा।
वेदान्ताचार्यसिद्धान्तविजयध्वजमाश्रये॥

वेङ्कटाचार्यरचिता वेदान्तचार्यसंस्तुतिः।
उपलाल्या बुधैरेषा शिशोरस्फुटवागिव॥

यद्वाणीकणपाठनिर्मलमना गर्वोद्धतानां पुरो
जेता संसदि वावदूकसदसां किञ्च त्रयीपारगः।
यत्पादाम्बुजसंस्मृतेरपि नृणां स्वर्गापवर्गोदय -
स्सोऽयं वेदशिरोगुरुर्विजयतामाचन्द्रमातारकम्॥ **1** ॥

आम्नायाञ्चलदेशिकाङ्घ्रियुगलीसेवारतेर्माधुरी
वैदग्धीपदबन्धतः स्मयहराः प्राचामवाचामपि।
जृम्भन्ते वचसां प्रवाहनिकरारिङ्खन् मिथस्सङ्गमा
नृत्यच्छम्भुजटाकलापविलुडद्गङ्गातरङ्गा इव॥ **2** ॥

डम्भध्वंसपटुर्विशृङ्खलमतिः कन्दर्पदर्पापहो
लोभक्रोधमदाभिमानकुहनाव्यापारनिर्वापकः।
मोहध्वान्तदिवाकरो विजयते धूताभ्यसूयानल -
स्त्राता नः कवितार्किकेन्द्र मृगराण्मूर्तो विवेको यथा॥ **3** ॥

तृष्णाऽभावतृणीकृतप्रभुकुलस्सिद्धान्तशुद्धोक्तिभिः
क्षुभ्यत्क्षुद्रकुदृष्टिसौगतमुखः प्राप्तागमव्याप्तधीः।
वादे जाग्रति वेदमौळिगुरुराडग्रे समग्रे कला
भेदे सर्वपथीनबुद्धिविभवो भूयादपायापहः॥ **4** ॥

वैराग्यं प्रतितन्त्रसारकृतिषु स्पष्टं तवालक्ष्यते
वैदुष्यं तव वेदशेखरगुरो ! सर्वार्थसिद्ध्यादिषु।
वैदग्ध्यं सकलातिशायि भवतस्सङ्कल्पसूर्योदये
शक्त्यस्ते न वसस्सुधां गुरुरपि स्तोतुं कुतो मादृशः॥ **5** ॥

आम्नायान्तगुरुं सनातनगुरोर्मान्यामिवान्यां तनुं
चेतस्संश्रय गोचरेषु विपुलाकारेण चारेण किम्।
मन्वीथा न परं कदापि सहजाहङ्कारहुङ्कारिणं
क्षीरं किं परमर्थयेत निवसन् मुग्धोऽपि दुग्धोदधौ॥ **6** ॥

यदि भगवतः पद्मानेतुर्दया मयि भूयसी
भवजलनिधेरुत्तारश्चेत्तदङ्घ्रिनिषेवणात्।
विहितविषयासक्ता बुद्धिर्ममान्यविरागिणी
निगमशिखराचार्यादन्यं कदापि न सेवताम्॥ **7** ॥

निजगुरुपदप्रेमा रामानुजार्यवचस्सुधा -
परिचय भवस्थेमा कामादिदोषदुरासदः।
निरवधियशोभूमा सीमागुरुर्गुणसंपदं
जगदघहरन्नामा मामादरादवलोकताम्॥ **8** ॥

त्रयीमकुटदेशिकप्रवरमात्मनि ध्यायतां
न संसृतिदवज्वरः कुत उदेति भीतिः परा।
विवस्वति नभस्वति प्रसभमुद्गमोद्योगिनि
क्व सर्पति तमः कथा क्वनु च तूलराशेः स्थितिः॥ **9** ॥

दिगन्तविसरस्त्रयीपरिमळैर्निगुम्भैर्गिरां
    विकस्वरमुखाम्बुजस्त्रुतमरन्दपूरैरिव।
दुरन्तविषयाटवीविषमचारखेदालसान्
    निषिञ्चतु मधुव्रतान् निगमचूळिकादेशिकः॥ **10** ॥

न चेद्देवः श्रीमानवतरति बाह्यान्धतमसैः
    निरालोके लोके निगममकुटाचार्यवपुषा।
परिष्कारं त्रय्याः क इव कुरुते संसृतिमहा -
    पयोधौ मग्नानां क इव भविता नौरिव नृणाम्॥ **11** ॥

रुचिः प्राप्तुं लक्ष्म्या नयनभवनर्माणि सदया
    तरङ्गापाङ्गानि स्फुटकमलशोभानि यदि ते।
निमङ्क्तुं नित्ये चेदभिलषितमामोदजलधौ
    प्रपद्येथाश्श्वेतस्सकृदकृतवागञ्चलगुरुम्॥ **12** ॥

निष्ठाक निष्ठित वसिष्ठमुखो गरिष्ठ -
    श्रैष्ठ्योदयः स्वयमनुष्ठितवेदमार्गः।
निर्जित्य सौगत कणाद कुदृष्टिमुख्यान्
    निष्कण्टको जयति वेङ्कटदेशिकेन्द्रः॥ **13** ॥

बाह्यैरकृत्रिमगिरां जरतीकृतानां
    सञ्चारहेतुरवलम्बनयष्टिरिन्धे।
तारुण्यदा च कवितार्किकसिंहसूक्तिः
    रामानुजार्यमुनिजैत्रपताकिकेव॥ **14** ॥

आशु विस्तरविचित्रमाधुरीरीतयः फणितयो वितन्वते।
संसृतौ तमसि मज्जतां नृणामागमाञ्चलगुरोरुषः श्रियम्॥ **15** ॥

उक्तिभिस्सुमनसामिवालिभिर्यस्त्रयी कचभरानभूषयत्।
सुश्रुतेरुपरिभागदेशिकस्संविदन् दिशतु मेऽनपायिनीम्॥ **16** ॥

किं तेषामुपवासैः तपसा तप्तेन पुण्यतीर्थैर्वा।
प्रणमन्ति चेतसा ये सकृदपि वेदान्त देशिकेन्द्र पदम्॥ **17** ॥

परिपाकस्सुकृतानां अनन्तसूरेरपारकारुण्या।
घण्टावतारमूर्तिः घटयतु सन्मार्गसाभिलाषं माम्॥ **18** ॥

गुरुवर हर दोषं मद्विवेक प्रमोषं
    कुरु नयनविलासान् कल्पितांहोनिरासान्।
य इह शुभतरं ते सत्प्रबन्धं व्रजन्ते
    निगमपटुरमीषां अभ्युदेता मनीषा॥ **19** ॥

जयति शुभतमानां जन्मभूमिर्गुणानां
    पर इव परिणामः पुष्कलानां कलानाम्।
सुरतरुरिव भौमः संश्रितानां जनानां
    विमलतरविवेको विष्णुघण्टावतारः॥ **20** ॥

तीर्थोत्सवे महति शेषधराधरेन्दो
    तद्दैवतेऽप्युडुनि भाद्रपदे च मासे।
घण्टात्मनावतरतो निगमान्तसूरेः
    हृद्यां श्रियं वहतु विंशतिरत्नमाला॥ **21** ॥

॥ इति विंशतिरत्नमाला समाप्ता॥